International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 92-94
© 2026 IJMH
www.themultijournal.com
Received: 14-05-2026
Accepted: 06-06-2026
Publish : 08-06-2026

**Dr. Ashok Kumar Sadangi**
Sanskrit teacher,
Govt. SSD Girls high school,
Belapadar, kandhamal

**Correspondence:**
**Dr. Ashok Kumar Sadangi**
Sanskrit teacher,
Govt. SSD Girls high school,
Belapadar, kandhamal

# त्रिमुनि व्याकरणपरम्परा

**Dr. Ashok Kumar Sadangi**

**DOI**: https://doi.org/10.5281/zenodo.20828043

**सारांश -**

अभिव्यक्तिसाधनार्थं सार्वजनीनमाश्रमविशेषः, अद्यतनकाले भाषा इति पदने अभिधानं दधाति । जन्मन आरभ्य मृत्युं यावत् यदा प्रयोगक्षेत्रे अवतरति तदा आवापोद्वाषाभ्यां शब्दसंसारं परीचिनोति, ध्वनिवलयं प्रविश्य पदान्तराणां च एकस्मिन् अभिश्वान प्रकारे उपपाद्यवाक्यं विनिर्माति येन स स्वयं अववोध्यजायते अन्यान् अवगच्छति च किन्तु कालवैभवेन संसारस्य विचित्रता कारणात् नैसर्गिकउपपादनाच भाषायाः कृते निर्धारितध्वनिवलये यथार्थता आकलयितुं नैव शक्नोति । तस्य ध्वनेः परिवर्तनं विपरिणामः स्वभाविकतया जायते। अतः शब्द संघटने भाषासंधाने च विच्युतिरागच्छति। तत्र विषौ एकरुपतायाः सन्धाने विधाने व कस्यचित् अनुशासनस्य प्रयोजनीयता प्रवर्तते। तच्चानुशासनमद्यत्वे शब्दमर्यादया व्याकरणमिति अभिधियते । शब्दानुशासनम् शब्दतन्त्रमिति तस्व शब्दस्य इमे सन्ति पर्यायवाचिनः शब्दाः । साधूत्वसन्धानाय शब्दानुशासनविधिः अनेन शास्त्रेण अवधार्यते "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः" इति भर्नुहरेः प्रतिवचनम् । साधुत्वं नाम कालेन आगतानां शब्दानां प्रयोगार्हतासाधनम् ।

एतच्च व्याकरणशास्त्रं कालगरिम्ना भिन्नतां दधाति लोकाभिरुचिमादाय विभिन्नेनोपायेन प्रकारतां गृह्णाति। एतत्कृते ऐतिहां निगदति यत् प्रतिपदोक्तपाठादारभ्य सूत्रात्मकपाठ यावत् एतस्य शास्त्रस्य अनेकविधमुपपादनं प्रतिपदोक्तपाठः, सूत्रात्मकमुपपादनम्, पद्यात्मकनिवन्धनम्, गद्यात्मकनिर्वचनम् इत्यादि भावेन शब्दानुशासनस्य अनेकविधानि उपपादनानि । प्रतिपदोक्तपाठे प्रतिपदमनुशासनविधौ उच्चार्य्यते। अन्ये तद् गृहीतो जायते । प्रतिपदोक्तपाठःसफलं नाश्रितवान् - यत्तोहि महाभाष्यकारः तस्य रहस्यस्ग उद्घाटनं कृतवान्। अन्वैतस्मिन् शब्दोपदेशे सति किं शब्दानां प्रतिपतौ प्रतिपदपाठः कर्तव्यः गौरतः पुरुषो हस्ती शकुनिर्भूगो ब्रह्मण इत्येवमादाय शब्दाः पठितव्याः ? नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपदौ प्रतिपदपाठः एवं हि श्रुयते वृहस्यतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम । पञ्चतन्त्रेऽपि उक्तम् अवधार्यते "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः" इति भर्नुहरेः प्रतिवचनम् । साधुत्वं नाम कालेन आगतानां शब्दानां प्रयोगार्हतासाधनम्।

एतच्च व्याकरणशास्त्रं कालगरिम्ना भिन्नतां दधाति लोकाभिरुचिमादाय विभिन्नेनोपायेन प्रकारतां गृह्णाति। एतत्कृते ऐतिहां निगदति यत् प्रतिपदोक्तपाठादारभ्य सूत्रात्मकपाठ यावत् एतस्य शास्त्रस्य अनेकविधमुपपादनं प्रतिपदोक्तपाठः, सूत्रात्मकमुपपादनम्, पद्यात्मकनिवन्धनम्, गद्यात्मकनिर्वचनम् इत्यादि भावेन शब्दानुशासनस्य अनेकविधानि उपपादनानि । प्रतिपदोक्तपाठे प्रतिपदमनुशासनविधौ उच्चार्य्यते। अन्ये तद् गृहीतो जायते । प्रतिपदोक्तपाठःसफलं नाश्रितवान् - यत्तोहि महाभाष्यकारः तस्य रहस्यस्ग उद्घाटनं कृतवान्। अन्वैतस्मिन् शब्दोपदेशे सति किं शब्दानां प्रतिपतौ प्रतिपदपाठः कर्तव्यः गौरतः पुरुषो हस्ती शकुनिर्भूगो ब्रह्मण इत्येवमादाय शब्दाः पठितव्याः ? नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपदौ प्रतिपदपाठः एवं हि श्रुयते वृहस्यतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम । पञ्चतन्त्रेऽपि उक्तम् अनन्तपारं किल शब्दशास्त्रं, स्वल्प तथायुः वहवस विघ्नाः। अतः सूत्रात्मकस्य पाठस्य उपन्यसनं जातम् ऐन्द्रव्याकरणम् एतत् विषौ आदितम् । पाणिनौयव्याकरणं तेन प्रकारेण तस्मिन उपक्रमे च अन्यतमम् । अनेकानि व्याकरणानि पाणिने पूर्ववर्तिकाले आसन्। तथाहि

**नवव्याकरणानि -**

ऐन्द्रं चान्द्रं काराकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकल्यं पाणिनौयकम् ।।'

अपिच -
अष्टादशपुराणानि नवव्याकरणानि च। निर्मश्य चतुरोवेदान् मुनिना भारतं कृतं ।।"

**अष्टौव्याकरणानि**

ब्राहामैशानं ऐन्द्र व प्राजापत्यं वृहष्पतिम् । त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टकम् ।। इन्द्रश्चन्द्रकाशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्याष्टादिशाब्दिकाः ।।'

**पञ्चव्याकरणानि -**

"क्रतुव्यादिसूत्रान्तादृक्" ४/२/६०पञ्चव्याकरणाः । पाणिनीयं व्याकरणं अष्टसु व्याकरणेषु अन्यतमः ।।
तेषु सर्वेषु व्याकरणेषु विभागत्रयंमवशिष्यते-
१. छान्दसमात्रम् - प्रातिशाख्यादि ।
२. लौकिकमात्रम् - कातत्रादि
३. लौकिकवैदिकश्चेति पाणिनीयमापिशलञ्चेत्यादीनि ।

**पाणिनीयव्याकरणम् -**

पाणिनिना प्रोक्तमिदं सूत्रात्मकं व्याकरणम् । वार्त्तिककारस्य कात्यायनस्य कात्यायनस्य भाष्यकारस्य, पतञ्जलेश्च त्रिमुनिव्या-करणभावेन इदं ख्यातम् । प्रयोगविज्ञानमनुसृत्य सूत्रकृतापाणिनिना सूत्रमुपनिवद्धं वार्त्तिककृता वार्त्तिकवचनानि उपनिवद्धानि एवं च भाष्ये ता सूत्रवार्त्तिकयोः उपरि पल्लवनसाधनाय भाष्यवचनं संसाधितम् । त्रयः मुनयः अस्मिन् वंशिये सन्ति इति विग्रहवलात् इदं त्रिमुनिव्याकरणम् इति नैपुण्येन विचारितम् ।

अष्टाध्यायाः अनुशिलनेन प्रतिभाति यत् आचार्यपाणिनिः न केवलं स्वमतं स्वकीयं विवेचनं प्रस्तुतवान् । ऐतिहात् विज्ञायते पाणिने पूर्ववर्तिकाले पञ्चाशिति (८५) वैयाकरणाः आसान् । स्वयं आचार्य्य अष्टाध्यायां दशसंख्यकानां आचार्याणां नामोल्लेखं विहितवान् । ताथा -
१. आपिशलि "वा सुप्याशलेः
२. काश्यपः
"तृषिमृषिकृषेः काश्यपस्य"
"नोदात्तस्वरितोदयम गार्ग्यकाश्च पगालवनाम्""
३. गार्ग्य:-
"अङ्गार्ग्यगालवयोः""
"अतो गार्ग्यस्य"
"नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् "
४. गालवः -
"इको ह्रस्वऽयो गालवस्य""
"तृतीयादिषु भाषितपुंस्क पुंवत् गालवस्य""
"आङ्गार्ग्यगालवयोः""
"वेदान्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्"
५. चाक्रवर्मणः
"ई चाक्रवर्मणस्य""
६. भारद्वाजः "
ऋतो भारद्वाजस्य"
७. शाकटायनः
"लङः शाकटायनस्य"
"व्योर्लघुप्रयत्नतरः शाकटायनस्य""
"त्रि प्रभृतिषु शाकटायनस्य""
८. शाकल्यः
"सम्बुधौशाकल्यस्येतावनार्षे "
"इकोऽसवर्षे शाकल्यस्य ह्रस्वस्य""
"लोपः शाकल्यस्य"
"सर्वत्र शाकल्यस्य""
1. सेङ्कः
T "गिरेश्च सेनकस्य""
१०. स्फोटायनः "अवङ् स्फोटायनस्य""

तदनु आचार्याणां मतानि तथ्यानि प्रयोग विज्ञानानि च अङ्गीकृत्य आधारीकृत्यच त्रिमुनि व्याकरणस्य मूलभित्तिं संस्थापितवान् । तेषां सूत्राणां संख्या प्रायशः ३९९५ परिमितानि -
प्रथमःअध्यायः = ३५१
द्वितीयः अध्याय : = २६८
तृतीयः अध्याय : = ६२८
चतुर्थः अध्याय : = ६०५
पञ्चमः अध्याय := ५५५
षष्ठः अध्याय : = ७३६
सप्तमः अध्याय : = ४३८
अष्टमः अध्याय : = ३६९
एवमेव माहेश्वराणि चतुर्दश सूत्राणि ३९८३+ १४ = ३९९७ ।
५. रमाशङ्करमिश्र सम्पादित अष्टाध्यायी सूत्रसंख्यापरिगणनेन ३९९७ इति संख्या निर्धारिता ।
चतुः सहस्रीसूत्राणां पञ्चसूत्रविवर्जिता
अष्टाध्यायी पाणिनीया सूत्रैमहिश्वरैः सह ।।
३९८१+१४-३९९५
(स्वरसिद्धान्तचन्द्रिका, पृ. ३. श्लोक, 15 Annamalai University Edition)
३ त्रीणि सूत्रसहस्राणि तथा नवशतानि च । षण्णवति च सूत्राणां पाणिनिः कृतवान् स्वयम् ।। = ३९९६
४. सिद्धान्तकौमुदी = ३९७८ ।

माहेश्वर सम्प्रदायस्य परम्परायां पाणिनीयं व्याकरणं समागतं विद्यते । वार्त्तिककारः कात्यायनः प्रतिसूत्रं तत्र विषौ अनुरूपं वार्त्तिकवचनं प्रणीतवान् । केचन वार्त्तिककाराः पाणिनेः विपक्षपातं साधितवान् इति विवेचयन्ति किन्तु विवेचनातः प्रतिभाति वार्त्तिककारः पाणिनीयसुत्रोपरि वार्त्तिकवचनानि निर्माय पल्लवनं साधितवान् केवलं समासेन इदं प्रतिपादनेन अलम् । वार्त्तिककारस्य विचारणया इदं पाणिनीयशास्त्रं धर्मशास्त्रं यस्य प्रमाणिकता विचारिता सर्वथा विद्यते तस्य शास्त्रस्य ज्ञाने धर्म इति वार्त्तिककारः वार्त्तिकानि निर्णय शास्त्रमिदं धर्मप्रतिपादकम् इति विवेचयति-
१. शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु वा. ३
२. अस्त्यप्रयुक्त इति चेत् नार्थ शब्दप्रयोगात् वा. १
३. शास्त्रपूर्वकं प्रयोगेऽभ्युदयस्ततुल्यं वेदशब्देन वा. ४
एभिः धर्मप्रतिपादकमिदं शास्त्रमिति वार्त्तिककृता स्वीकृतं जायते । पुनश्च शाख्यात् उक्त्या धर्मशास्त्रपदस्य प्रयोगः अपि एतत् कृते साधितः -
१. धर्मशाखं च तथा पा.सू. १/२/६४ ।
२. सिद्धं तु धर्मोपदेशेनऽनवयवविज्ञानात् यथा लौकिकवैदिकेषु ।
३. धर्मोपदेशमिदंशास्त्रम् - पा.सू. ६/१/८४-वा. ५
उपपादनेन अनेन प्रत्येतुं शक्यते यत् पाणिनीयं शास्त्रं धर्मशास्त्रमिति।
तदुक्ता सूत्रकार भगवान् / आचार्य्य / सुकृत्। तथाहि -
भगवान् - एकदेश निर्देशात् वा स्वरानुनासिकभिन्नानां भगवतापाणिनेः सिद्धम् । आचार्य्य "आचार्याचारात् संज्ञासिद्धिः"
(म.भा. १/१/१ वा.४)
सुकृत् - "बहुब्रीहिस्वरः शास्ति समसान्तविषेः सकृत्"
(म.भा.६/२/१, श्लोक.वा.१।

सूत्रपात्तपदप्रयोजनं प्रदर्थ्य सूत्रकारस्य सपक्षपातं आचरितवान् तथाहि-

1. "नव सत्" - 3/2/12

"तौस्यादित् वचनमसङ्गतार्थम्" - वा. १

2. "इदुपधाय गोहः" 6/4/89

"गोहिग्रहणं विषमार्थम्" - वा. १

"अयादेशप्रतिशेधार्थ च"- वा-१

"ह्रस्वदेशे ह्य्यादेशप्रसङ्ग उत्वस्यासिद्धत्वात्" वा ३ इत्यादीनि । भाष्यकारः व्याख्यानं विधाय सूत्रोवार्त्तिकोपरि भाष्यं विरचितवान् यत्र अनेकविधस्य आशयस्य परीक्षणं यथार्थ्यसाधनम् च जातं विद्यते। तद्यथा-

म.भा. १/१/२४ यथैव प्रियाष्टौ प्रियाष्टा इति सिद्धति। प्रियाष्टानौ प्रियाष्टान इति न प्राप्नोति । यथालक्षणमप्रयुक्ते ।

म.भा. २/४/३४ - यथेवमेनश्रितको न सिध्यति । एनच्छितक इति प्राप्नोति । यथालक्षणमप्रयुक्ते ।

म.भा.६/१/३८- सर्णव कीर्तयतेरप्रत्ययः कौरिति प्राप्नोति किर्ती इति चेष्यते। यथा लक्षण प्रयुक्ते ।

म.भा. ६/१/८३- यथेवं वेडोऽप्रत्यये उरिति प्राप्नोति । उदिति चेष्यते। यथालक्षणप्रयुक्ते ।

म.भा. ६/४/२- एवमपि कर्तुं वै अत्र न प्राप्नोति । यथालक्षणप्रयुक्ते ।

म.भा. ६/४/१९- तथा वांछतेरप्रत्ययोवान् वांश इति न सिध्यति । यथालक्षणप्रयुक्ते।

म.भा. ६/४/१६३- पयिष्ठ इति न सिध्यति। पयशिष्ठ इति प्राप्नोति । यथालक्षणप्रयुक्ते ।

म.भा. ७/२/१०६- दू इति प्राप्नोति । स्व इति चेष्यते । यथालक्षणप्रयुक्ते ।

एवं भावेन त्रिमुनिव्याकरणस्य पल्लवनाय उत्तरवर्त्तिनिकाले अनेने पाणिनियाः आचार्याः आविर्वभुवुः । तेषु -

१. रुपवतारः धर्मकीर्त्ति ।

२. प्रक्रियातन्त्रम् -

३. प्रक्रियारत्नमणिः कृष्णलालाशुकमुनी ।

४ . सर्परूपे विमलसरस्वती।

५. प्रक्रियाकौमुदी - रामचन्द्राचार्यः ।

सिद्धान्तकौमुदी व्याख्यातारः -

१. भट्टोजिदीक्षितः - सिद्धान्तकौमुदी, प्रौढमनोरमा, शब्दकौस्तुभः ।

२. ज्ञानेन्द्रसरस्वती - तत्त्ववोधिनी ।

३. नीलकण्ठः- परिभाषावृत्तिः ।

४. रामानन्दः - तत्त्वदीपिका

५. रामकृष्णभट्टः - रत्नाकरः ।

६. नागेशभट्टः - लघुशब्देन्दुशेखरः, वृहच्छब्देन्दुशेखरः ।

७. शिवरामः - विद्याविलासः ।

८ . रङ्गनाथः- पूर्णिमा।

९. वासुदेवः - वालमनोरमा ।

१०. वेणीमाधवः - कौमुदीकल्पलतिका ।

११. जयकृष्णः - सुवोधिनी ।

2. गोपाल शास्त्री - सरला।

१३. रामचन्द्रः - इन्दुमती ।

१४. वैद्यनाथः - प्रभा-शब्दकौस्तुभः, भावप्रकाशिका- शब्दरत्न, छाया-उद्योत, चिदस्तिमाला- लघुशब्देन्दुशेखरः ।

१५. प्रक्रियासर्वस्वम् - नारायणभट्टः ।

१६. प्रतिसंस्कृतसिद्धान्तकौमुदी - सोमनाथशर्मणः ।

कौमुद्याः स्फुटग्रन्थाः -

१७. विश्वेश्वरभट्टः - वैयाकरणसिद्धान्तसुधानिधिः ।

१८. शब्दाङ्कुरः - विश्वराजेन्द्रः ।

3. वरदराजः मध्यसिद्धान्त कौमुदी।

२०. शब्दार्थरत्नम् -

पाणिनीयं शास्त्रं व्याकरणप्रणिं सर्वकालिकसाधनमहिम्ना अनुशास-नवरेण्या संक्षिप्तानुशीलनवर्त्मना च सर्वाणि व्याकरणानि अतिशेते । तत्रत्यं तथ्यं प्रयोगतात्पर्य विचारसाधनं पारिभाषिकशब्दनिर्वचनम् लक्षलक्षणाभिगमनोपायप्रतिपादनं वस्तुगत्या विचाराय उपकल्पते । एतत् सर्व परीक्ष कारिकायां उपस्थापितम् "यदाचार्य आह तदस्माकं प्रमाणम्" ।

**शब्द कुंचिका -**

**नवव्याकरणानि , पञ्चव्याकरणानि, अष्टौव्याकरणानि, प्रक्रिया-तन्त्रम्, शब्दार्थरत्नम्, प्रतिपदपाठः, शब्दानुशासनविधिः, शब्दा-ङ्कुरः, प्रक्रियासर्वस्वम्, स्फुटग्रन्थाः,**

**ग्रन्थसूची**


1. अर्थशास्त्रस्य भूमिका- डा. शिवनाथ, नागरी प्रचारिणी सभा, काशी, संवत् २०१८।
2. अष्टाध्यायीसूत्रपाठः - डा. रमाशङ्गर मिश्रः, मोतिलाल वनारसीदास, वाराणसी, १९९७
3. अहाध्यायी सहजबोधः (भाग १-४) -डा. श्रीमती पुष्पा दीक्षित, पाणिनीय शोध संस्थान,विलासपुर, २००४.
4. अष्टाध्यायी - ब्रह्मदत्तजिज्ञासु, प्यारेलाल कपुर, मन्त्री श्री रामलाल कपुर दृष्ट, अमृतसर, १९८१ ।
5. उणादिसूत्र - दयानन्द सरस्वती स्वामी, युधिष्ठिर मीमांसकः, चौखम्बा सस्कृत प्रतिष्ठान, दिल्ली, १९७४ ।
6. ऐतरेय ब्राह्मण (प्रथमप्रपाठक) - डा. सुधाकर मालवीय, तारा पब्लिकेसन्स्, वाराणसी, १९८० ।
7. काव्यप्रकाशः - मम्मट, डा. श्रीनिवास शास्त्री द्वारा सम्पादित, साहित्य भण्डार मेरठ, १९७० ।
8. काव्यशास्त्रम् - राजशेखर, बड़ौदा प्राच्य संस्थान, बड़ौदा, 1934.
9. काशिकावृत्तिः - बामन जयादित्यौ, जिनेन्द्रबुद्धि कृत न्यास तथा हरदत्तमिश्र विरचित पदमञ्जरी, प्राच्यभारती प्रकाशन, वाराणसी, १९६५।
10. धात्वर्थविज्ञानम्- ड. भागीरथप्रसादत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयः, वाराणसी, १९८०
11. धातुपाठों में अर्थनिर्देयशः- ड. मायाए चैनानी, विद्या-निधिप्रकाशन, दिल्ली, १९८५ ।
12. निरुक्त - यास्क, ज्ञानमण्डल लिमिटेड, वाराणसी, १९६६ ।
13. निरुक्त - यास्क, दुर्गसिंहकृतटीका, मेहरचन्द्र लक्ष्मणदास, दरियागञ्ज, नई दिल्ली, 1964.
14. संस्कृत व्याकरण का इतिहास (प्रथम, द्वितीय तृतीय भाग), युधिष्ठिर मीमांसका, रामलाल कपूर ट्रस्ट, बहलगढ़ (सोनीपत), सं.2041।
15. वैयाकरणसिद्धान्तकौमुदी-श्रीभट्टोजिदीक्षितः, महामहोपाध्यायः श्री -गिरधरशर्माचतुर्वेदी, मोतीलाल बनारसीदास, १९७९ ई.।
16. वाक्यपदीयम्श्री - भर्तृहरिः श्रीरामगोविन्दशुक्ल, चौखम्बा संस्कृत सीरीज ऑफिस वाराणसी-१, १९६१ ई. ।
17. पाणिनीयशिक्षा - महर्षिपाणिनिः, श्रीरुद्रप्रसादः अवस्थी, तदेव १९७२ ई।